This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीजमणिः २

१ श्रीगणेशायनमः॥ श्रीमद्भद्रकाल्यैनमः॥ श्रीसमस्तग्रामनिवासिन्यैनमः॥ विघ्नध्वंसनहेतुर्व
रदो देवो वतादनिशं॥ एकोजयतिपदास्येदशनोयत्रासंस्फुटं कंदः॥१॥ न्यक्कृतमसारमहिमा गिरिन्नागले
नीलिमा जयति॥ गौरीकपोलचंद्रेयदंशुवोलक्ष्महरिणंति॥२॥ अभिनवनीरदवपुषं माहेश्वरीनेह्रूपेकमा
वपुषं॥ अपिमग्नः शोकलयेद्धरथतनयं मनोमुदे कलये॥३॥ छंदःसुधाब्धिलहरीरामपुरस्तादिमां सुग
मां॥ संक्षेपान्निगदामो विबुधामोदप्रदां श्रवणात्॥४॥ अथगुरुलक्षणं॥ दीर्घः सानुस्वारो विसर्गसहितो
द्विमात्रपरः॥ संयुक्ताद्यश्च गुरुर्वर्णो वा भवति चरणचरमस्थः॥५॥ अथ गणानां स्वरूपनामदैवतानि॥ आ
दौमध्येंतेलायरता भजसास्तेगाममेनोगलौक्रमतः॥ जलवह्निरवेंदुसूर्यानिलावनिनागदैवतास्तेषां॥६॥ अष्ट
मूर्तेः शिवस्यैते ज्ञानीमो ह्येगणामताः॥ यदेषामधिपाभूतस्सूर्येंदुग्रंथकारिणः॥७॥ ग्रंथकारीयजमानः॥
अथ फलानि॥ वृद्धिमतिश्रन्यकीर्तिशोकविदेशोङ्गतिश्रियः सौख्यं॥ ददतिक्रमात्फलमिदं गणाहिमानुष
कवितादौ॥८॥ अथ कवित्वादौत्याज्यवर्णाः॥ हङ्कसघनधररखभवणाः गीतकवित्वादिषु त्याज्याः॥ अथ द्विगण
विचारः॥ द्विगणविचारोपितथाभिधीयतेवैरिमित्रताश्च मिथः॥९॥ मनयोर्मैत्रीयभयोर्भृत्यत्वं स्याद्थोदा
स्यं॥ जतयोर्वैरं रसयोर्वर्णकवर्ण्यैप्रतिव्यवस्थेयं॥१०॥ छंदांसि काव्यकृद्भिः कथितानि च यानि पिंगलग्रंथे॥ तान्य १

Checked 2012

Acc. No. ~~1129.~~ M-1907
Title - छन्दःसुधाब्धिलहरी.
Author - भौगाधर याज्ञिक महापात्रा.
Date - A.D. 1694.
Sub - वृत्त.
folio - 23 avalible (2 missing)
Xerox - 44.

KKSU LIBRARY RAMTEK 441 106 M-1907 Dist. Nagpur

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोद्गाहरणे प्रकटीकुर्मः प्रसिद्धानि ॥११॥ प्राग्ग्रंथस्थितनामान्यनुक्रमाच्छंदसां प्रकाश्यंते ॥ तत्क्रमतस्तदुदाहृतिरथवा
यसिंस्कृतैः पद्यैः ॥१२॥ तत्रादौ मात्रावृत्तानि ॥ तत्र गाथालक्षणं ॥ प्रथमतृतीयचरणयोर्द्वादश मात्रा भवंति य
स्यास्तु ॥ अष्टादश द्वितीये तुर्ये तिथिसंमता गाथा ॥१३॥ अस्या आर्येत्यपि नाम ॥ यथा ॥ कामं भाजितकामं वस्तु
लोलामं किमप्यय ग्रामं ॥ संपेत्तुतिक्रूरामं विपद्विरामं श्रयेरामं ॥१४॥ अथोपगीतिलक्षणं ॥ गाथोत्तरार्द्धसदृशं
ज्ञा ५ पूर्वार्द्धं चेत्कृतं भवति ॥ उपगीतिर्विगीतो ह्यापिंगलनागेन साधुसा कथिता ॥१५॥ यथा ॥ अयि राममकाममपि दत्तं दी
पा ६ नेमयि धेहि कारुण्यात् ॥ दूषितदुर्गसनैर्यथाभवेयं भवसद्वाकुरतः ॥१६॥ अथोद्गाथालक्षणं ॥ गाथापूर्वार्द्धं
न प्रपद्यते चेत्परार्द्धमपि सेदृशं ॥ उद्गाथा गीतिः सा पिंगलनागेन कथ्यते कृतिना ॥१७॥ यथा ॥ सीतापतेन ना
तिसत्कृत्यपन्नार्थिपालनं हि पणः ॥ विरतोपि यस्य पन्नेमपि दुर्दैवात्कथं त्वसौ शिथिलः ॥१८॥ अथ गाथिनील
क्षणं ॥ यदि गाथातुर्यपदं विंशतिमात्रं प्रयुज्यते कविभिः सा गाथिन्युक्ता ॥ यथा ॥ अभिनवजलधरजयकरत
चिरतनुछायनर्जितमन्मथरः ॥ सुरभिनातनिबिडपरिष्टनपरिसरधरणिगिरी द्रभ्रूऊद्ययति तरां ॥१९॥ अथ सिंहि
नीलक्षणं ॥ तस्या विपरीता सिंहिनीति पिंगलाभिमता ॥२०॥ यथा ॥ रां भुकुंपापालीनां क्षेत्रं सत्यान्निकृत्तपापाली
नां ॥ अयतीरावस्यायस्तरं श्रियेस्तमंतरां वयौघः ॥२१॥ अथ स्कंधकलक्षणं ॥ प्रथमं द्वादशमात्रा विंशतिमात्रा द्वितीये
यकेपि चरणे हि ॥ एवं तृतीयतुर्यौ स्कंधकचरणौ तु पिंगलोक्तिविख्यातौ ॥२२॥ यथा ॥ रत्याटोपदकमलं हरिमीडे सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदंगिरांपदकमलं॥ यस्यचसापदकमलंजगसुनीतिव्रजऊहृद्वीपदकमलं॥२३॥ यथावा॥ मनस्यारामंकुलयेदधतंप्रणयेनज्ञा
नकीमंगलये॥ प्रणतसुमित्रातनयंनिदेशाकरणेनमारुतिविव्रातनयं॥२४॥ अथदोहालक्षणं॥ पदयोः प्रथमतृतीययोः
मात्राविश्वमिताहि॥ भवतुलिताद्विकलैर्युयोदोहां पठतोत्साही॥२५॥ दोहायथा॥ रघुकुलतिलकपदांबुजंभावयमान
समित्र॥ यदहर्निशमानेदितानवभवितातिपवित्र॥२६॥ अथसुललितंनामांतरेणरसिकातस्यालक्षणं॥ उल्ल
धिमिहयुगलमिहकलयतदनुनगणमपिकलय॥ भवमितेलघुरसपदमिहसुललितमितिपरिवदति॥ फणिपतिर
तिललितमति॥२७॥ सुललितंयथा॥ दशरथसुतनवजलदं श्यामतपवनमयफलद॥ खलहतिध्वनमरसुरासुरपति
कृतनतिनिकरसदयहृदयहरितनरघुभवरमिहममविलर॥२८॥ एतस्यैवरसिकाउल्केतिनामनी॥ अथरोलाछंदः॥
रोलावृत्तमवेहिनागपतिपिंगलभणितं॥ प्रतिपदमिहचतुरधिककला [illegible] विंशतिपरिगणितं॥ रुद्रमितावधिविरतिरवि
लजनचिंताहरणं॥ सुललितपदमदकारिविमलकविकंठाभरणं॥२९॥ यथा॥ दशरथराजकुमारमारविजयिकृतिमं
स्फुत॥ महदानीतिकलौकलोकविध्वंसनपंडित जनकसुताविभ्राभरामगुणधामदयामय॥ धमर्दनिरस्यनरेशाकेशापरव
चोतिगामय॥३०॥ अथगंधाणाखंदः॥ दशसपवर्णमुहुरचयप्रथमचरणं॥१७॥ द्वितीयमष्टादशकलितमति
हृदयहरणं॥ ईदृशमुत्तरदलमपिकलेहृदयंसंधानकं नागपतिपिंगलभणितसंधानकैः१८॥३१॥ यथा॥ नव्यजल
जभयतरसमयकरगतशरं॥ हयक्रयविघ्रकरणलक्ष्याक्षसेनानिकरं॥ अथ्यकायकलैकलितदिव्यबंधनुति
भरं॥ सौमित्रामसहयाममुदितधाममदिवसकरं॥३२॥ अथचौपैयाछंदः॥ चौपैयावर्त्तंत्रिंशन्मात्रंफणिपतिपिंगल
गीतं॥ कुरुमनस्तुरंगममतिहृदयंगममंतेगुरुमुपनीतं॥ यदिदशवसुरविभिःछंदोयद्भिःत्रिंयतेयतिरभिरामं॥ सपदि

प४ मि.१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रवणसमये नृपतिः कवये वितरति संसदि ग्रामं ॥३३॥ यथा ॥ रावणकुलखंडन रघुकुलमंडन खलबलदंडनधारी ॥ तापस
भयवारणसुचरित क्षारणकठिनमहारणकारी ॥ राघवकुलनेता बालिविजेता चरितत्रेताचारी ॥ मामवतु स रामः प्रकलि
तकामश्रेनो गृहसंचारी ॥३४॥ अथ वैतालछंदः ॥ इह सप्तचतुष्कलगणनिर्मितपदत्रिलघुविरामं भवति यदि ॥ नागाधिप
पिंगलभणितसुमंगलवैतालवृत्तमिदं द्विपदि ॥३५॥ रघुनायक राघव कृतरिपुलाघव हतविविधाघ वरदजगाति ॥ हर
मेरुरुणामय वचोनिश्राम यविपदामनयमघविहितम - ति ॥३६॥ अथ चंद्रानंदछंदः ॥ एकादशविश्रामितुर
गविरामियदि घनाक्षरं भवति ॥ छंदो घनाक्षरमिदं मानंदकारि नागपतिरिति वदति ॥३७॥ यथा ॥ जनकसुताविः
श्राम दुरितविराम रविकुलमंडन मिह जयति ॥ योगींद्राणां ज्ञानगरिमध्यानमानसतवं यो नयति ॥३८॥ अ
थ षट्पदीछंदः ॥ षट्कलमादौ तदनु चतुष्कुरगं परि संतनु ॥ द्वौ षेड्ढिकलं कलय चतुःपदमेवं संचिनु ॥ षट्पदनामा भ
वति फणिनायकपिंगलगीतं ॥ रुद्रे विरतिमुपैति नृपतिसुखकरमुपनीतं ॥ कल्लोलयुगलमत्र चभवेदष्टाविंशति
कलमितं ॥ शृणु पंचदशे विरतिनिश्चितपठनादेव गुणगणहितं ॥३९॥ यथा ॥ कौशिकयज्ञत्राणबाणहतनैकनि
शाचर ॥ लीलाभग्नपिनाकचापकचक्ष्यस्थगितामर ॥ जनकसुताप्राणेशादेशाजितपितृशासन ॥ पंचवटीमुनि
वत्सलक्षररक्षःकुलनाशन सुग्रीवमित्र सौमित्रिसुत हनुमत्सेवितविनयमय ॥ कृतसेतुबंध रावणनिधनदाशार
थे रघुवीर जय ॥४०॥ अथाडिल्लछंदः ॥ छंदसि षोडशकलं विलासिनि प्रतिपदमंते यमकविलासिनि ॥ अडिल्ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामपयोधरधारिणि नो बेनियतलघुद्वयधारिणि ॥ ४१ ॥ यथा ॥ मानवमानसमुचितं मानय मूढान्यस्मिन्‌ चेतो मानय ॥
विषयासक्तय ज्ञाननिन्ना मयरामपदं भजवचो निन्नामय ॥ ४२ ॥ अथ पादाकुलकं छंदः ॥ अक्षर गुरुनियमविरहितं
भुजगराजपिंगलपरिलपितं ॥ भवति सुगुंफित षोडशकलकं वाणीभूषणपादाकुलकं ॥ ४३ ॥ यथा ॥ विश्वामित्रयज्ञ
विधिरक्षणप्रकटित धीरवीरवरलक्षण ॥ काकपक्षधरवितरित कामघनसुंदरजयरघुवरराम ॥ ४४ ॥ यथावा ॥
मुदिरमनोहरसुंदरभासं विरचितचातकचित्ताश्वासं ॥ विलसितसविधगसीतारांपं भजराम कृतरावणकैपं ॥ ४५ ॥
अथ चउबोला छंदः ॥ षोडशमात्राप्रथमपादे पठ द्विकचरणे मुनिभिर्गणिता ॥ उत्तरदलमध्येवैविरचयच
उबोलाछंदस्तत्कथय ॥ ४६ ॥ यथा ॥ रावणहतिकृतकीर्त्तिकदंबकपांडुरितत्रिभुवनभवनं ॥ रामं भजत मुनी
द्रैर्मर्ग्यैर्विरचितबहुविलसत्स्तवनं ॥ ४७ ॥ अथ रड्डा छंदः ॥ प्रथमपदे दशपंचनिधेहि न्यूनास्ताः पुरतः पठ ॥
पुनरपि पंचदशैवतदग्रे रुद्रमितास्तदनुपठ ॥ प्रथमसमे पंच ममपि कथयदोहामध्ये भणपुनः पदन
वकं परिधेहि ॥ रड्डाछंदस्तदिह कवि पिंगलमतमवधेहि ॥ ४८ ॥ यथा ॥ दशरथराजकुमारकुरु छककरुणा
लेशं लघुमपि ॥ तेन भवेन्मम सफलेजन्मनि ॥ कृतसत्यवैराघवं मानवविद्विषि मे मानद ॥ प्रतिज्ञातमादोकु
र्वैः सकृच्छरणगतमीशा ॥ त्रातुं त्राणद भयहरण करुणामयजगदीशा ॥ ४९ ॥ अथ पद्मावती छंदः ॥ यदि
अष्टचतुष्कलगणनिर्मितपदकरपदकर्णैर्द्विजविहिना सा पद्मावती काविविधमुमहिता जगणविरहि
तासुकविहिना ॥ इह दशवसुभवनैर्भवति रामः सकलाभिमतफलायतदा ॥ फणिनायकपिंगलभणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुमंगलरसिकमनःसंविहितमदा॥५०॥यथा॥रविकुलतिलकमसोरघुनायकसीतानाथदयांबुनिधे॥मुनि
कुशिकानंदकरक्षस्कंदकनिजबलरक्षितयज्ञविधे॥ममदुरितंनाशयपरःप्रकाशयभक्तिंभासयममयिवि
कले॥विधिभवसुरवंदितनित्यानंदितिदासंगणयनिजेसकले॥५१॥अथकुंडलिकाछंदः॥कुंडलिकासाकथ्य
तेप्रथमंदोहायत्र॥ओलाचरणचतुष्टयंप्रभवतिनियतंतत्र॥प्रभवतिनियतंतत्रपदंप्रतिसुललितयम
कं॥अष्टपदीसाभवतिविविधकविकोत्तलगमकं॥अष्टपदीसाभवतिसुरचितमंडलितमंडलिका॥कुंडलि
नायकभणतिविबुधकर्णेकुंडलिका॥५२॥यथा॥पुरहरधनुषोभंजनेसमनुरंजितारामं॥जनकसुताभव
नातभ्रातशैवजननेतारामं॥जनतारामविनानुभ्रूपराजिविंद्रुलिता॥एषामिहमतिरनिशादर्पेनरकुलि
तादलिता॥कलितादलितारातिजातिखंडनखंडितसुर॥सागरबंधनकरणकोपरणरावणपुरहर॥५३॥
अथगनांगछंदः॥षट्कलमादौविरचयतोषेरगणविभूषितं॥मध्येनियमविहीनंद्वादशकेयतिसंगतं॥फणपति
पिंगलवर्णितकविकुलहृदयरंजनं॥पंचाधिकविंशतिकलवृत्तमिदंगनांगनं॥५४॥लक्ष्मणवत्सलराघवनवज
लधरविलसत्तनो॥ज्यामदग्निजयविनोदितभुजबलसुंदरताऽतने॥मामवशंकलिदूषितमतिकृपयाकरुणानि
धे॥भावयरघुकुलभूषणवितरितदुर्गतसन्निधे॥५५॥अथद्विपदीछंदः॥आदौषट्कलसंगतमेतत्तदनुपंचच
तुष्कलम्॥गुर्वंतद्विपदीभवतीहहिविंशत्यष्टदले॥५६॥यथा॥सेवनदानंदानंनैतेतत्प्रभवतितद्वेदनं॥नीत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लयामुंघनवद्राघवदासंदुरितनिकेतनं॥५७॥अथ स्खलना छंदः॥प्रथमदनॄर्मत्रयासकलरसपाश्रया॥पुनरपिच
सप्तदशमात्रकासा॥स्खलनानामकं छंदउद्दामकं नागराजोदितं चारुभासा॥५८॥यथा॥विमलमतगंजिनीज
नहृदयरंजिनीसकलखलभंजिनीपरमरम्या॥छतिनिकरभंगिनीकुशिकसुतसंगिनी परविदनुषंगिनी विबुधन
म्या॥५९॥नवजयतियातनुधीरयंतीधनुर्नयतु मामाजनुर्भवविकूपरं॥भक्तकृतसन्निधेरामकरुणनिधेधामवा
४ रांनिधेदुरितदूरं॥६०॥अथ खंज छंदः॥द्विजवरनवगणमुपनयतदनुच विमलकमलदलमदुलसुतनुरगण ४
मिहहिखंजके॥द्विदलममलमतिफणिवरनरपतिनिगदितमिदमतिशयगुणसहृदयहृदयसुरंजके॥६१॥यथा॥
नवजलधरसुललितरुचिभरसमुदयसुखकरवरतनुलसत्तमं॥प्रणमतरघुकुलतिलकमखिलसुरवरनवभु
जगनिकरहितक्षमं॥६२॥अथ शिखा छंदः॥द्विजवरमिहहिर सगुणितमुपनयतदनुजगणमपिविधेहि॥वसु
युगगणितमपरदलमपिकुरुफणिनरपतिसुभणितरुचिरेशिखाद्युति॥६३॥शतगुणसमुदितदिनकरवेहके
रुचिरनिकरवरसमाच॥अभिनवजलधरबिलसदमितरुचिदशरथतनयमतवरतमुदंचे॥६४॥अथ माला
छंदः॥द्विजवरनवगणमिहकुरुतदनुरगणमपिकलयकमलमुखिकर्णवक्षेषे॥अपरदलगाथाया माला
वत्तं विचित्रंतत॥६५॥यथा॥रघुकुलतिलककलितकृपविलपतिमथिकुरुनयनरुचिमनिशमुपेतां शीर्षे॥अ
मणतावज्रवतोममनुकैनार्थैजनुर्मे विना॥६६॥अथ चूलिआला छंदः॥दोहादलशेषेयदापंचकले॥विमलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि विराजति ॥ फणिवरनृपतिः किल तं दाचुलि आलामिहतामनुगायति ॥ ६७ ॥ यथा ॥ करुणाक्षीरांभोनिधौ नेविदितेम
दुमानसे वद ॥ राघवमयिकरुणाकुतः समुदयमेति नलोकसुखास्पद ॥ ६८ ॥ अथ सोरठाछंदः ॥ तत्सोरठावृत्तममल
मुरगपतिरतिवदति ॥ यद्दोहाविपरीतिमिह जनहृदि मुदमुपनयति ॥ ६९ ॥ यथा ॥ अभिनवजलदश्यामरामरूपजि
तकामनय । मुनिमानसविश्रामचेतो मम निजे चरणे ॥ ७० ॥ अथ हाकलिछंदः ॥ द्विजगणसगणसगणभगणकलि
ताभवंति चतुर्दशकलकलिता ॥ अंते गुरुमुपधायसखा हाकलिरेषा भवति तदा ॥ ७१ ॥ यथा ॥ नवजलधररुचिरुचि
रतमाःसरसहृदयमविरतरतमा ॥ नवतनुरिह मम दिशतु सुखं रमयतु रघुवरलसदसुखी ॥ ७२ ॥ यथा वा ॥ रघुकुलति
तिलक दिशतु मम सा हतहृदयं ध्वतमतितमसो ॥ सपदि विरचय विकाशमयं तनुरुचिरिह त्वं प्रतिसमयं ॥ ७३ ॥ अ
थ मधुभारछंदः ॥ सगणं निधाय जगणं विधाय ॥ श्रुतिसौख्यधाम मधुभारनाम ॥ ७४ ॥ यथा ॥ मम शीर्षमेहि च
रणं निधेहि । अयि रामकाम मनिशं ललाम ॥ ७५ ॥ अथाभीरछंदः ॥ एकादशकुलधारि कविकुलमानसहारि । रुद्रमाभी
रमधेहि जगणमंतमविधेहि ॥ ७६ ॥ यथा ॥ सुग्रीवाहितराग रामाऽमितकृतयाग ॥ निजसाकृतकारो मामामाशुकृप
य जगदीश ॥ ७७ ॥ अथ दंडकलिते छंदः ॥ आदिगुरुः कुरु षष्ठमपि गुरुः तदनु च सर्वलघुवर्णपठितं । वेदमितविरती
हः तदनु च सर्वलघुवर्णपठितं । वेदमितविरतीहः तदनु च गुरुयुगमेत दुरुयमलयुगं । गौलयुगमभिनीय वरम
गमितिनय छंदो भरणारम्यरसरसं ॥ दंडकलितमुदीरय ललितमति शापकाव्येरुचिपोबंसुमस्वं ॥ ७८ ॥ यथा ॥ श्याम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिसुशोभिततनुजितघनसुंदरतनुशोभानिकरे ॥ चिंतचरसुदुस्तरसरभसभवरवरदुर्गतिकरदुःखाघभरे ॥ रामदू
तिपनुर्भृतिनिजमुखजितविधुमंडलहृहमवरागिमनः ॥ संस्मरणमभिप्सितमुपनयपरिलयमधिककः स्वतः सुजनः ॥ ७७ ॥
अथ दीपकछंदः ॥ तुरगैकमुपधायसुरेनरेंद्रमवधाय ॥ इह दीपकमवेहि लघुमंतकैमधिधेहि ॥ ८० ॥ यथा ॥ रघु
नाथमघदाहि शरणं समुपयाहि ॥ कलुषमवबेहि जनुरेवभुवनेहि ॥ ८१ ॥ अथ सिंहावलोकितछंदः ॥ शृणु सिं
हविलोकितवृत्तवरंवर - मकमनोहरचरणधरं ॥ धरणीपतिमानसमधिकलितं किल वेदचतुःकलगणललितं ॥ ८२ ॥
यथा ॥ भजराममकाममुदामुदारमतेनवयः शिरसीह मुदारमते ॥ अयि कामसहस्रदलं भवेदनिशं परितिष्ठ भवेवि
भवे ॥ ८३ ॥ अथ प्लवंगमछंदः ॥ बहुकलमादिगुरुं प्रथमं कुरुसेततं पंचकलं चततोपि चतुःकलमगतं ॥ नायकमत्रच
तुर्थमितिगुरुमंतके एकाधिकविंशति प्लवंगमवृत्तके ॥ ८४ ॥ यथा ॥ राघवमाशु मनोमिलितं भज मूढरे तार
यमामलं समलं कुरु मरचरोई दृशमाप्य पतिं जनुषः फल - नया जीवय जीव मिमं परमंनयसन्नया ॥ ८५ ॥ अथ
लीलावतीछंदः ॥ लघुगुरुवर्णनियमं विहरितमिह हि सुकलयचतुष्कलमहगणं ॥ द्वात्रिंशत्कलरचितमिदंम
तिशायसहृदयहृदयकहरणं ॥ लीलावतिका भवति चकरकर्णद्विजगणजगणभगणकलिता ॥ फणिनायक
पिंगलविरचितमद्भुतवचनममलगुंफनललिता ॥ ८६ ॥ यथा ॥ रघुनायकराघवदशरथनामदकर्मकरणाशो
भितसुमते ॥ मुनिमखसाधकरक्षणलालितलक्ष्मणतत्क्षणहतरक्षोवितते ॥ करयन्नविधायकजनसुखदाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्रकीर्तिनीचक रहत विभ्रसदा॥ करुणातवचिद्रवैभवहत नयवमस्तु ममहृदि परितोषदा॥८७॥ अथह
रिगीताछंदः॥ इंद्रासनं प्रथममिसर्जयतदनु संचिनुषट्कलं नदनु पंचकलत्रयं किलकुरुविरामकुंदुले॥ अ
ष्टाधिकामिह विंशतिचकलाः कलावतिसुंदरं हरिगीतमितिहरिगीतकैवरवृत्तमतिरसमंदिरं॥८८॥ यथा॥
करुणाजलधिवरवीचिता सहृद क्षिसर सीरुहखिषा॥ अतिदीनमभिनतमेषमां परिभावयतु दुरितखिषा॥
प्रणतं वपुषि कलितामयं समयं सपदि विधुरं चितं॥ प्रियजानकीवदनांबुजो रघुनायकः परमेशता॥
॥८९॥ अथत्रिभंगीछंदः॥ प्रथमं यदि दशमं भवदति विरमं तदनु निकामं वसुरसुके॥ वसुमितलतुरंगमभिति
हृदयंगमहृषितभुजंगमनपतिलके॥ त्रिंशद्विकलविलासं सततनिवासं हृदयमुदः॥ मदमुदितजंगीमोहतरं
गीवदति भंगीवृत्तमदः॥९०॥ यथा॥ करशोभितचापे हतजनतापे सरसालापे मोदमये॥ रणरावणघा
तिनि शरदात पाति निदुष्कृत शाति निविहतजये॥ धुतिलंघितकामे जगदभिरामे नयनललामे नत
सदये॥ नवजलदश्यामे गुणविश्रामे हृत्तेवांरामे सपदि नये॥९१॥ अथदुर्मिलाछंदः॥ द्वात्रिंशन्मा
त्रं भवति पवित्रं फणिपतिजल्पितवृत्तवरं॥ दशवसुभवनैर्यतिरत्र प्रभवति कविकुलहृदयानंदकरं॥
यघष चतुष्कलकलितं सकलपादमितिदुर्मिलिकानामपरं॥ नरपतिवरतोषणवंदिविभूषणभुव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नविदितसंतापहरं ॥ ९२ ॥ यथा ॥ कौशिकयज्ञनिखिलविधिरक्षदक्षसुलक्षणवीरमहारण ॥ रक्षःकुल
बहुपक्षवृक्षगणकालानलजनभीतिनिवारण ॥ गिरिजाधनुर्भंजनखलगंजनजामदग्निमदमोचनका
रण ॥ श्यामतामरसदामरम्यजयरघुवररामभक्तभवतारण ॥ ९३ ॥ अथ हीरकछंदः ॥ यदिह टगणमंसरग
णमेवचरणशोभितं ॥ षट्पसुदतिनागनृपतिरवदतिनो हितं ॥ राजभजनकालपठनएवरटनरंजनं ॥ हीर
क इति नाम भवति कामभवति सज्जनं ॥ ९४ ॥ यथा ॥ सिंधुसबलबाहुभुजगराजिसुरारसत्फणं ॥ भव्यमिनरपा
णिकलितचापनलिनमुल्बणं ॥ नव्यमुदिरधामरुचिरमत्तमुदितबर्हिबं ॥ राममखिलकामकरणमद्भुत
लसुविबं ॥ ९५ ॥ अथ जहरणंछंदः ॥ लघुगुरुकनियमगतमिह फणिपतिमतमवगतमतिसुखनिगाद
पदं ॥ दशवसुभवनैर्यतिरिह हि यदि भवति रसिकजनहृदयविहितमदं ॥ वसुविमलचतुष्कलगुणहृत
गुणिगणचरणविरामहितसगणं ॥ कश्चिदपि गुरुसहितं भवति कविहितेछंदः सुंदरि जनहरणं ॥ ९६ ॥
यथा ॥ निगमवचनविरचन·चतुरिमविकचन·कलितकुनालमतिविदितगतिं ॥ अगणितप्रभुमगु
णगण·दृढतमणिजपण·परिहतपुरपुरण·विजयततिं ॥ कृतचरणकमलनतिमनुजदुरितहतिस
करुणहृदयमखिलवसतिं ॥ भज रघुकुलतिलकितमविरतपुलकितवपुरिह रहसि वरदं नृपतिं ॥ ९७ ॥

KKSU LIBRARY
RAMTEK
441106
M-1907
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ अथ मदनगृहै छंदः॥ प्रथमं कुरुषट्कलमंते कुंडलमिह मध्ये रसुतुरगवरं संतापहरं॥ दत्वावसुभुवनाणिमिर
त्रेचरणंममिभवेतिविरामेयदिललितंकविकुलयहितं॥ फणिनायकभणितंजगणविरहितेचत्वारिंशत्कलकलि
तंभुवनेहै तंमदितंरसनिकरंतन्मदनगृहंनरपतिसंसदिलब्धपदंगुरुत्रोपगदं॥ ९६॥ यथा॥ नवजलदनया
मंचितरितक्रामंजगदभिरामचरितधरणंकरुणावरणं॥ चितरावणतापंकरगतचापं सायकनिकरवरक्षिक
रणहृतरणतरणं॥ हितवानरसेनंदुरितसेनपवनतनयचरणंत्रिभुवनशरणं॥ भजरामंवरदंमदवर
स्वरदं नपविजनकसुतेछाचरणंविप्रियहरणं॥ ९९॥ अथमरहट्ठाछंदः॥ आदौकुरुषट्कलमंत्रतुचेष्कलपंचा
नंदमितोपि। दत्वावस्विकला। भवतिविरतिवत्रा। मधिकभुजामममलोपि॥ विंशतिनवसंख्यं। कवि — यंदित
गुणगणकोटि॥ मरहट्ठावृत्तंकिलजयकृतेकृतरिपुविनतकोटि॥ १००॥ यथा॥ दिनकरकुलनेतावेरिविजेताचि
नमलकरुणाकारि। मुनिजनगणपाता। खलतोलवाता। तारितगोतमनारि। सुचरितमितितूर्णंकीर्त्यापूर्णंकृत
वानसिमहदेव॥ अयिकुरुमयिलेनाविठ्ठलकेनोकरुणायानरदेव॥ १०१॥ अथप्राकृतीछंदः॥ सानामान्यनु
क्रामति॥ गाथा १ विगाथा २ उगाथा ३ गाथिनी ४ सिंहिनी ५ स्कंधक ६ दिपथा ७ सुललित ८ रोला ९ गंधाणा १०
चौपैया ११ घत्ता १२ घत्तानंद १३ षट्पदी १४ अरिल्ल १५ पादाकुलक १६ चौबोला १७ नवपटरछा १८ पद्मावती १९
कुंडलिका २० गगनांगन २१ द्विपदी २२ झूलणा २३ खंजा २४ शिखा २५ माला २६ चुलिआला २७ सोरठा २८ हाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७

लि २९ मधुभार ३० आभीरक ३१ दंडकलित ३२ दीपक ३३ हिंहावलोकित ३४ प्लवंगम ३५ लीलावती ३६ हरिगीता ३७
त्रिभंगी ३८ दुर्मिला ३९ हीरक ४० जनहरण ४१ मदनगृह ४२ मरहट्ठ ४३ इत्यष्टचत्वारिंशन्मात्रिकछंदांसि ॥ छ ॥ [redacted]
इति श्रीगौडीयालिंगमाहापात्रविरचितायां छंदःसुधाब्धिलहर्यां मात्रावृत्ताख्यः प्रथम उल्लासः ॥ छ ॥ अथ
वर्णवृत्तानि ॥ तत्र श्रीछंदः ॥ यद्गोः सा श्रीः ॥ १ ॥ यथा ॥ स्ताद्वाः मे द्राक् ॥ २ ॥ अथ द्व्यक्षरप्रस्तारे कामं छंदः ॥ यस्मि
न्हारौ ॥ कामः स छंदः स्यात् ॥ ३ ॥ यथा ॥ मेघश्यामं वंदे रामं ॥ ४ ॥ अथ मधुछंदः द्विकलघु मधुरिति ॥ ५ ॥ यथा ॥ रघुव
र ॥ नपजय ॥ ६ ॥ अथ महीछंदः ॥ लघुश्च गुः ॥ मही स्मृता ॥ ७ ॥ यथा ॥ तव प्रभो ॥ पदं भजे ॥ ८ ॥ अथ सारुछंदः ॥ हारलघु धा
रि सारू ॥ ९ ॥ एहि राम ॥ चित्तधाम ॥ १० ॥ अथ ॥ अक्षरप्रस्तारे नाली छंदः ॥ नाली सा निर्दिष्टा दृष्टिर्मो यत्र ॥ ११ ॥ यथा ॥ गी
रेशा मे रामं ॥ गोपंती स्यात्कामं ॥ १२ ॥ अथ प्रियाछंदः ॥ जो हलं दृश्यते ॥ सा प्रिया कथ्यते ॥ १३ ॥ यथा ॥ धेहि रे राघवे ॥ वं
निजमानसं ॥ १४ ॥ अथ नारीछंदः ॥ यकारेण सिद्धः ॥ चतुष्पाछनी स्यात् ॥ १५ ॥ यथा ॥ भज स्वामिरामं ॥ मनो मे निकामं ॥ १६ ॥ ७
अथ रमणछंदः ॥ सगणो रमणः ॥ कविना कथितः ॥ १७ ॥ यथा ॥ कुरु मे करुणां ॥ रघुपाविरत ॥ १८ ॥ अथ पंचालछंदः ॥ कर्णेन
गंधेन ॥ पंचालमाख्या हि ॥ १९ ॥ यथा ॥ द्राग्ये हि रामाय ॥ चेतस्व कामाय ॥ २० ॥ अथ मृगेंद्रछंदः ॥ पयोधरधारि मृगेंद्रमवेहि ॥ २१ ॥
यथा ॥ विधेहि मयीन्द्र ॥ कृपां नु मिहेव ॥ २२ ॥ अथ मंदरछंदः ॥ दर्शितो यदि ॥ मंदरमेव तु ॥ २३ ॥ यथा ॥ मामिह मालय रोघ
वपालय ॥ २४ ॥ अथ कमलछंदः ॥ कमलमयत न गणमिह तु ॥ २५ ॥ यथा ॥ सकलभवति जगति जयति ॥ २६ ॥ इति त्र्यक्षरप्र
स्तारस्याष्टौ भेदाः ॥ ॥ अथ चतुरक्षरप्रस्तारे तीर्णाछंदः ॥ यस्मिन्वृत्ते कर्णौ कर्णौ ॥ वेदैर्वर्णैः स्यादिह तीर्णा ॥ २७ ॥ यथा ॥
आर्यो नाथ त्राता राज्ञा ॥ सीतानाथः सेवा भाज्या ॥ २८ ॥ अथ धारीछंदः ॥ यत्तु पक्षि दंडलक्षि ॥ वेदवर्णधारि धारी ॥ २९ ॥

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा। कामरूप राम भूप। देहि काम मल्ल धाम॥ ३० ॥ अथ नगाणिका छंदः॥ द्वितुर्यके गुरू यदा। नगाणिका भवेत्तदा॥ ३१॥
यथा॥ कृपाकरं रघूद्वहं। वरो यतं भज स्वतं॥ ३२॥ इति चतुरक्षर षोडश भेदेषु द्वियंतो भेदाः॥ ॥ अथ पंचाक्षर प्रस्तारे संमो
हा छंदः॥ द्वौ कर्णौ हारः संमोहासारः। वर्णपंचैवं नागाधीशोक्तं॥ ३३॥ यथा। श्रीन्नत्यापारः कारुण्योदारः। धामा विश्रा
मः पायात्मां रामः॥ ३४॥ अथ हारी छंदः॥ आद्यंत कर्णाः पंचैव वर्णाः। लघ्वेक वारी वाच्यः स हारी॥ ३५॥ यथा॥ श्रीदायीसिं
धोदीनैकबंधो। त्रायस्व दासं रामाविना री॥ ३६॥ अथ हंसछंदः॥ पिंगल दृष्टो भवति विशिष्टः। कर्णयुतो सौ भामि
नि हंसः॥ ३७॥ यथा॥ राघवदेवः सत्कृत सेवः। कामितदायी प्रोल्य विधायी॥ ३८॥ अथ यमकं छंदः॥ नगणमनु द्विलघु
कुरु। फलितमितियमकमिति॥ ३९॥ यथा॥ अयि कृपय विजयेन य। रघुतिलक लघुसदय॥ ४०॥ ॥ अथ पंचाक्षरस्य
द्वात्रिंशद्भेदेषु द्वियंतो भेदाः॥ ॥ अथ षडक्षर प्रस्तारे शेषा छंदः॥ एवा व... र्णैः षड्भिः प्रोक्ता छंदो वद्भिः। सर्वे वर्णा यस्यां
दीर्घा शेषा सा स्यात्॥ ४१॥ यथा॥ सेव्यो मेघश्यामः श्रीपीबाणी रामः। तूर्णीयुग्धृद्धीमा स्फूर्य सुक्तादामा॥ ४२॥ अथ
तिलका छंदः॥ सखि सद्वितपं सुदती हयदा। रसवर्णपदा तिलकेति तदा॥ ४३॥ यथा॥ घनपोसुभगो जलदाभतनो। अ
निशं रघुपविनि वेहि मम॥ ४४॥ अथ विमोहा छंदः॥ पत्रपादद्वयं दृश्यते रद्वयं। नागराजोदितं सविमोहा मता॥ ४५॥
यथा॥ सीतयानाश्रयो। राघवो नीरदः। मस्तुस्तोद्यं शोभिताहूर्निशं॥ ४६॥ विजोहेत्यपि नाम॥ अथ चतुरंसा छंदः॥ द्वि
जवरकर्णा दृढरसवर्णा। भवति यदा सा किल चतुरंसा॥ ४७॥ यथा॥ वितरितकामैः सकरुणरामः। निजपदसत्तां म
म हृदि धत्तां॥ ४८॥ अथ मंथानं छंदः॥ कर्णध्वजानंद गाधायसदानंदा। वर्णैरसेर्ये नु पंथा नमेतत्तु॥ ४९॥ यथा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तूणीरबाणौघ·चापातिविभ्राजि। रामास्यधामाधि·रास्तां पुरो धावि।५०। अथ शंखनारीछंदः॥ ध्वजानंदकर्णाःषडे
गात्र वर्णाः॥ बुधानंदकारी भवेच्छंखनारी।५१।यथा॥ लसन्नीरदश्यामलोगः सुवेत्राः। पुरस्तान्ममास्तां रघूत्तम एषः॥५२॥
अथ मालतीछंदः॥ यदाजुगणद्विभवेदमलपाफणीवितनोतिसुमालतिकेति।५३।यथा।सदारमुदारमरण्यवि
हारी।धिनोतिममाघमनोरमहः॥५४॥ अथ मदनकछंदः॥ द्विगुणनगणमिहविततनुहि।दमनकमिदमितिगदति
हि॥५५॥यथा॥ गमयसमयमनिशमनय। रघुपतिचरणभजनकरण।५६। इतिषडक्षरप्रस्तारस्य चतुःषष्टि६४
भेदेषु कियंतो भेदाः॥ ॥अथ सप्ताक्षरप्रस्तारे समानिकाछंदः। हारमेरुगायदा·रज्जुगाभवेत्तदा। सप्तवर्णसंगता
सा समानिका मता॥५७॥यथा। सीतया निषेवितं लक्ष्मणेनुजेहितं। नीरदप्रभाधरं राघवं नयातवं।५८। अथ सु
८ वासकछंदः॥ द्विजगणमाहार·भगणमुपाहर। भणति सुवासकमिति फणिनायक।५९।यथा।वरदकृपालय
रघुवरपालय। जनमिममोनय·निजपदमीनय।६०।यथा। रघुतिलकपाहि अथ करहंचीछंदः। द्विजगणम
वेहि·जगणमनुयेहि। विविधरससंचितमवतिकरहंचि।६१।यथा। रघुतिलकपाहि·हृदयमुपयाहि।मयिवितर
दृष्टिमभिरचितपुष्टि।६२। अथ शीर्षरूपकंछंदः॥ उक्तावर्णाः सप्तास्याः सर्वे दीर्घाः स्युर्यस्याः। एवा शीर्षा निर्दिष्टा
केशाहवंतो दृष्टा ६३।यथा। ऐक्ष्वाकोरक्षः कालः पायान्मायाभूपालः॥ बध्वांभोधौ द्रास्सेतुं पापलंकेशं जेतुं।६४॥
इति सप्ताक्षरप्रस्तारस्याष्टाविंशतिशत१२८भेदेषु चत्वारो भेदाः॥ ॥अथाष्टाक्षरप्रस्तारे विद्युन्मालाछंदः। उक्ता
यस्यामष्टौ वर्णाः पादे पादे सर्वे दीर्घाः॥ विश्रामस्यात्तुर्यैस्तुर्यैर्विद्युन्माला निर्दिष्टा।६५।यथा॥ मार्तंडस्यश्रीम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टो ह्रेयो भूपालः पूर्णश्चंद्रः। कारुण्याब्धिः सीतास्वामी सोयं दीनानस्मान्यायात्॥६६॥ अथ प्रमाणिका छंदः। प्रमाणिका
जरौ लगौ। यथा। मयूरमोदपूरदः शरासनी शरी वने॥ धराजयाजटाधरो युतो वनांतनीरदः॥६७॥ अथ मल्लि-
का छंदः॥ हारलौ रविक्रमेण मंडिता सुवर्णकेन॥ वर्णिता कुतूहलेन मल्लिकेति पिंगलेन॥६८॥ यथा॥ पुण्यधामराम
नाम सर्वदा सुमंगलस्व। अनेन ते शुभा गतिः निरेन सः प्रभाविनी॥६९॥ अस्याः समानिकेत्यपि नाम। अथ तुं
गा छंदः॥ द्विगुणनगणकर्णैः सुललितसुवर्णैः सुललितसुकर्णैः रचितविहितरंगा प्रभवति किल तुंगा॥७०॥
यथा। दिनकरकुलभूषा नरपतिगणपूषा। कलयतु निजसक्तिं मम विषयविरक्तिं॥७१॥ अथ कमला छंदः। द्विज
वरगणान्वितं जगणगुरुसंगतं। फणिनृपतिजल्पितं कमलमिति कल्पितं॥७२॥ यथा। भज हृदय राघवं कृतदुरि-
तलाघवं। इह जनुरपार्थकं प्रकुरुष्व सार्थकं॥७३॥ अथ माणवक्रीडितं छंदः॥ भात्तलगं माणवकं। यथा। लोकदया
दानरतं दानिरथिं भावयतं। एषमया गादिनयस्तेन भवेद्रजयः॥७४॥ अथानुष्टुप् छंदः। लघु स्यात्पंचमं यत्र गु
रु षष्ठं तु सर्वतः। द्वितुर्यपादयोर्ह्रस्वमष्टाक्षरमनुष्टुभं॥७५॥ यथा। रावणारीरमाकांतो राघवोऽव्यतुनोऽघतः॥
अवतारीक्षमाकांतो न घ भावदेनोच्युतः॥७६॥ गोमूत्रिकेयं॥ इत्यष्टाक्षरप्रस्तारस्य षट्पंचाशदधिकद्वि
शतभेदेषु २५६ क्रियंतो भेदा उक्ताः॥ ॥ अथ नवाक्षरप्रस्तारे महालक्ष्मीछंदः॥ दृश्यते पक्षराजत्रयं यत्र वृत्ते म
नोहारके। संततं पिंगलेनोदिता सा महालक्ष्मिका कीर्तिता॥७७॥ यथा। देहि रे मानसे राघवे माकुरुष्व जनुर्लाघवे।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यथा सर्वथारोरवे यास्यसि प्रस्फुरन्मोरवे ॥७८॥ सारंगिकाछंदः ॥ द्विजवरकर्णौ सगणं विरचय पयस्याश्वरणे ॥ ज
गद्भिरामं हितयाभवतिहि सारंगिकया ॥७९॥ यथा समुदित धामा स्वतनैतिमिरमयं मेवितती ॥ जगति स विभ्री
न रतो हृदयगमनो हरतां ॥८०॥ अथ पाइपूर्त्ताछंदः ॥ आदौ कर्णद्वयलललितं कृत्वा विप्रं गुरुसहितं ॥ तद्वृत्तपिंगल भ
णितं पाइत्तेति श्रवणाहितं ॥८१॥ यथा ॥ चौपीरवङ्गीन्हारधरणस्तूणीरीमिव शाकरणः ॥ अक्षौ रग्रेभवतु सदारा
मस्यामोजति मुदा ॥८२॥ अथ कमलं छंदः ॥ द्विजवरकगणयुगं कलयगुरुविरतिगौ ॥ भणित फणिपतिरिदं क
मलमिति रतिपदं ॥८३॥ यथा हतसुमतिविलसितिमज हृदयरघुपतिं ॥ विहतदुरितचिततिंज हिहि विषय
गरतिं ॥८४॥ अथ बिंबछंदः ॥ नगणककरगंधकर्णौ भवति नववर्णपूर्णं ॥ फणिवदनभूषणं यभवति किल बिं
बमेतत् ॥८५॥ यथा ॥ रघुतिलकरामभूपः विजितरणकामरूपः ॥ त्वरितरचितत्रायी मम भवतु कामदायी ॥८६॥
अथ तोमरंछंदः ॥ प्रथमं करविधाय जगणद्वयं च निधाय ॥ इति तोमरं सुखकारी कविराजवक्त्रविहारी ॥८७॥
यथा ॥ रघुभूपराम नरदेव तव साकपाम हृदेव ॥ मयि यत्न नो विहगांत पतनान्यपस्य शिहंत ॥८८॥ अथ रूपामा
लीछंदः ॥ चत्वारोस्मिन्कर्णा जायंते छंदस्येकं हारं कुर्वंते ॥ रध्यावर्णाः पादे राजंते रूपामालीवृत्तं तत्क्रांते ॥८९॥ पा
रावारेव ध्वायेसेतुं वानैर्जे ते द्रायक्षकेतुं ॥ लंकाधीन्शंपोल स्यं चक्रे दास्ययातं पास्यन्सख्ये ॥९०॥ ॥ इति नवा
क्षरप्रस्तारस्य द्वादशाधिक पंचशतेषु भेदेषु ५१२ कियंतो भेदाः ॥ ॥ अथ दशाक्षरप्रस्तारे संयुताछंदः ॥ सगणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरः कुरु शोभितं जगणद्वयं गुरुसंगतं। फणिनायकेन निवेदिता भवती हि संयुतगाहिता॥९१॥ यथा। रघुनायकस्य पदशोभ रंप
रिपांतु सर्वचराचरं। कुलपंतमुग्रसहत्तनुं स्मरते दिशामिमहामनुं॥९२॥ अथ पंचकमाला छंदः॥ पादविराजन्नूपुरयुग्माकुंज
लशोभासंगि सुवर्णा। शंखवनी हारद्वयपूर्णा चंचकमाला भाति सुवर्णा॥९३॥ यथा। सायकपाणिं चापलसंतं तूणधर
वीरं विचरंतं। नीरधरा भं वीरमुदारं भावय रामं चित्तमुदारं॥९४॥ अथ सारवती छंदः॥ दीर्घलघुद्वयमध्यगणा हारे विराजि
चतुश्चरणा। पिंगलनागमते गणिता सारवती कविसार्थहिता॥९५॥ यथा। भावय मानसमेघरुचिं संततुरेजनुरे वसु
विं। राघवमादरतो विरतं रक्षितदासजनं भजतं॥९६॥ अथ सुषमा छंदः॥ कर्णौ हिलघुः कर्णौ मगणाः श्रोत्रे गुरुणा पूर्ण
श्चरणाः॥ यस्यां भवति मुग्धे परमा सैषा सुषमा स्यात्सुषमा॥९७॥ यथा। सीतादयितः श्यामो ललितः सद्भीदारभ
या पाकलिता। आस्तां रामो वरदः सततं ध्यातं रे हे तालस्यां ते वितते॥९८॥ अथामृतगतिका छंदः॥ नगणपयोधररुचिरा कुसु
मविराजितसुकरा। वसुलघुदीर्घयुगलगा भवति सखे मृतगतिका॥९९॥ यथा। दशरथभूधववनन यं विरचितशोभितमु
नयं। रघुवरमाभज सततं भुवि कुरु पुण्यमभिमतं॥१००॥ इति दशाक्षरस्य चतुर्विंशत्यधिकसहस्रभेदेषु १०२४ पंचभे
दानुक्ता॥ ॥ अथैकादशाक्षरप्रस्तारे बंधुछंदः॥ भत्रयशोभितसंगतकर्णैः एकसुसंगतपंक्तिवर्णैः। पंनगराजनिवेदितबं
धुराजतिभूपतिसंसदि बंधुः॥१॥ यथा। नीलपयोधरसुंदरदेहः पेटकभक्तिसमुत्थितगेहः। नूतनतापसवेषविहारीमे
तसुखायसकाननचारी॥२॥ दोधकमित्यपिनाम। अथ सुमुखी छंदः॥ नगणविराजितयस्थितयं कविजनभाषितरत्तच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

यांप्रभवति च्रोषस्व हस्त्रमुरली विनिगदिते हतदा सुमुरली ॥३॥ यथा ॥ रघुकुलनायकमीनाम हृंदन्त्र रथतोषकरस्तव हं ॥ सुमनसिग
मसुदारमतिरह सिमजामिसजामिगतिं ॥४॥ अथ शालिनीछंदः ॥ मत्तौ कर्णौ मंडितौ कुंडलेन शंखं हारं नूपुरं रावमुक्तं ॥ चत्वार
त्वं चामरं चापि भाति शालिन्येषा प्रेयसी पिंगलस्य ॥५॥ यथा ॥ नीलांभोदश्यामलं चापवंतं मुक्तादामश्रीवकालीलसंतं सी
तायुक्तं वन्यशोभानुरक्तं वंदे रामं याचनानंदनकामं ॥६॥ अथ दोधकवृत्तं छंदः ॥ दोधकवृत्तमत्रितया द्गौ ॥ यथा ॥ नीरदभाजपि
शोभितमत्नौ विष्णपसंभ्रतसत्कृतिप्तौ ॥ राघवनाम निराजितकीर्तौ खेलतु मे हृदये शुभमूर्तौ ॥७॥ अथ दमनकछंदः ॥
द्विजवरगणयुगममलं तदनुचकलयकरतलं ॥ फणिपतिवरपरिगणितं दमनकमिदमतिललितं ॥८॥ यथा ॥ रघुवर
चरणसरसिजं सुचरितकृतदुरितमजं ॥ सकरुणमविरतभजने प्रणमत भजत सुविजने ॥९॥ अथ सेनिकाछंदः ॥
श्रेणपुरी रिता रजौ रलौ गुरुः ॥ यथा ॥ अप्रमयामेहि राममंतरं सच्चालामरूपधाममास्वरं ॥ स्वीयजन्मसार्थयस्वस
त्वरं हठपापकृत्यमहमाचिरं ॥१०॥ सेनिकेत्यपिनाम ॥ अथ मालतीछंदः ॥ आदौ च लो रो स्यां वर्णौ द्व्यंते न्वौ बे यस्यां
नाम हाराजायंते ॥ रुद्रैर्वर्णैः पादे पादे संख्याता मालत्येषा वर्णीभूषा विख्याता ॥११॥ यथा ॥ कौशल्यायामातुर्बाह्वा
यः प्राणाः यस्यामोघाः शत्रुप्रध्वंसा वाणाः ॥ सीतानाथः सो सावास्तां राजा मे रक्षाकारी स्थ्यं दक्षः संग्रामे ॥१२॥ अथें
द्रवज्राछंदः ॥ स्यादिंद्रवज्रा जतजा गुरू चेत ॥ यथा ॥ उद्दाम धामा कुशिकात्मजस्य पश्चाद्व्रजक्ष्मामवगाहमानः ॥ प्रभो
जरश्रीर्धृतकाकपक्षो रक्षो युद्धास्तां मम से बलक्ष्यः ॥१३॥ अथोपेंद्रवज्राछंदः ॥ उपेंद्रवज्रा जतजा गयुग्मं ॥ यथा ॥
दूंदीवरश्यामतनुं सचापं शरैर्हि बांनिर्मितभूरितापं ॥ समं सुमित्रातनयेन यातं वने मुने मोदकरं नमामः ॥१४॥ अथा

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पजातिछंदः॥ उपेंद्रवज्रापदसंगतानि यदींद्रवज्राचरणानि चस्युः॥ ततो पजातिः कथिता कवींद्रैः भेदा भवंती ह चतुर्दशा
स्याः॥१५॥ विश्वोपकाराय विधायतारं निजावतारं हरिदश्ववंशे॥ पउद्धारक्षितितः स्वभारं रक्षप्रतारं स हरिर्मुदेस्तात्॥१६॥
अथ रथोद्धताछंदः॥ रान्नरौलघुगुरू रथोद्धता॥ यथा॥ शीर्षकैशोभितजटौघमंडिते राक्षसौत्कर विनाशपंडिते॥ अ
स्तु मे नवरतं मनोरतिः स्याद्घनो विरलकालसद्गतिः॥१७॥ अथ स्वागताछंदः॥ स्वागतानुरनभाद्गुरुयुग्मं॥ यथा॥ श्या
मलं मुनिजनैः कमनीयं रामनाममललितं रमणीयं॥ श्यामधाम किमपीह मया स्तां लोचनस्य सुखकौरि पुरस्तात्॥१८॥ अ
थानुकूलाछंदः॥ स्यादनुकूला भतनगगाश्चेत्॥ यथा॥ नीरदकायं धृतनरमायं संपदुपायं विबुधसहायं॥ आपदपा
यं वितरितदायं परितरायं कलयसि नायं॥१९॥ अथ भ्रमरविलसिताछंदः॥ मोगौनौगो भ्रमरविलसिता॥ यथा॥
सीतानाथः सुचरितभवनं भीतानाथः प्रकटितकरणः॥ मे पन्थाय सुललितवपुषा वीरो रामः कलयतु कुशलं॥२०॥
अथ मोटनकंछंदः॥ स्यान्मोटनकं जतजाश्च लगौ॥ यथा॥ आनंदपरीतमुदारमते कारुण्यसमेतमुदीतवरे॥ सीतेश
मनग्य गुणौघमये सेवस्व पदांबुजमिलिंदरुचिः॥२१॥ अथ शालिनीछंदः॥ वेदैश्छिन्ना शालिनी मात्ततौ गौ॥ यथा॥ सी
तां प्राणप्रेयसीमध्वखिन्नां दृष्ट्वा दृष्ट्वा दीयमानो नितांतं॥ तातं बिभ्रद्वक्त्रपंकेरुहां तं श्यामो रामो रण्यभूमीमयासीत्॥२२॥
इत्येकादशाक्षरप्रस्तारस्या एवं त्वारिंशदधिकसहस्रद्वयभेदेषु २०४८ कियंतो भेदाः प्रदर्शिताः॥ अथ द्वादशा
क्षरप्रस्तारे विद्याधरनामके छंदः॥ चत्वारो मा विद्यानंदे छंदो बोध्यं॥ यथा॥ दीप्तो टर्यो ग्रीष्मातापे भीष्मो मार्गे श्रोम
न्नामं रक्षौ राज्ञी जे छेवीरः॥ कारुण्यान्धिः शोकाक्रांतः सीताहेतोः सिंधौ वध्वा सेतुं लंकानाथे॥२३॥ अभुजंगप्रयातेछंदः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्भिर्यकारैर्भुजंगप्रयातं। यथा। स्फुरन्नारहारावलिभ्राजवक्षः स्फुरद्योतमानोन्नमत्काकुपक्षः॥ समीपस्थसौमित्रियु
ग्मन्यवेषः परास्ताधिरासं पुरस्तान्नमेषः॥२४॥ अथ स्रग्विणीछंदः॥ सम्मता स्रग्विणी रैश्चतुर्भिर्मिता। यथा। न्यापद
न्नुस्तोम्भी हृदीन्त्रो हरौ नारिता ज्ञामिले नीरदस्यामिले। चंचच्चकोक्रूरसत्स्पाणिपंकेरुहे मामकं मानसं लीयतामन्वहं॥२५॥
एतस्या लक्ष्मीजरेस्यपि नामा यथा गा। कामनामा मनकी मामनाद्रास्थिरा रामनामन्यमोधामनान्यद्गते। कामयेनापरं ना
मयेनोश्चिरस्ता मयेन द्रुवं चामयेचक्षुषी॥२६॥ अथ तोटकछंदः॥ इह तोटकमंबुधिसैः प्रथितं॥ यथा। रमणीयरुचोरु
मनीयतरे नवमेघनिभे रघुराजवरे॥ ममभानसमेतु सदैव रतिं विषतो विषयाद्विमतो विरतिं॥२७॥ अथ सारंगछंदः॥
सारंगमेतस्चतुर्भिस्तकारैरभि। यथा। उद्दामसामंतरत्नायमाणिक्य विराजिता हर्निशा श्रुकुंडोभि। धामास्फुरामोभिं
थं कामदं नाम सीतेत्र या त्यां नमस्मीतामुगन्नाता॥२८॥ अथ मौक्तिकदामछंदः॥ पयोधरमत्र चतुष्कमवेहि कलाः किल च
११ रलोचर्जनादेहि। भुजंगपतेहृदि मौक्तिकदामसुवृत्तमिदं शृणु मौक्तिकदाम॥२९॥ यथा। तुदिवरकोपसमिद्धहुताशस ११
मुद्धतशीलपतंजितवैरि। भगोरघिवंशमुदीतमुदारमहो मनसा नमयनजयरामः॥३०॥ अथ मोदकछंदः॥ पादयुगे
कुरु नूपुरसुंदरमाशु करे कुसुमद्युयमाहर। सुंदरि सर्वजनैकमनोहरमोदकवृत्तमिदं परिभावय॥३१॥ यथा। यद्वयथा
गतकौशिकसंगतराघवराजद्दिने न विलोकिनि। स्नेहजनितलोचनमुद्रितपंकजवत्स्मितेकिमु चित्रमिति हापति॥३२॥
अथ तरलनयनीछंदः॥ तरलनयनि रिह ननननैः॥ यथा। दिनकरकुलवरदिनकररंजितनवलनैजेघररुचिधराख
रवरजितहतपरनररघुवरहठनयजयजय॥३३॥ अथ सुंदरीछंदः॥ नभभरैः किल सुंदरिकेति सा॥ यथा। जनक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजसुतारघुराजयो विकसितांबुजकांतिविजित्वराः॥ नवकरग्रहणोत्सवमंगले परिजयंति दृगंतरसोर्मयः॥२४॥ अथप्र
मिताक्षराछंदः॥ प्रमिताक्षरा सगणतोजससैः॥ यथा॥ रघुराजसूनुमवलोक्य भराजनकात्मजामुदमवापयथा॥ वि
षमं विचिंत्य धनुरौग्यमसावभज्जनथामनसितापचयी॥३५॥ अथद्रुतविलंबितंछंदः॥ द्रुतविलंबितमाहनभौभ
रौ॥ यथा॥ रघुपतेतवपादसरोरुहे मनसिभावयुतो ममनित्यदे॥ दुरितवाम्यसुतामपिहांतरं किमितनूगामपदृपा
तपनंभवेत्॥३६॥ अथचंद्रवर्त्मछंदः॥ चंद्रवर्त्मनिगदंति रनभसैः॥ यथा॥ क्रोंचवनमगमवेक्ष्य सरभसंधन्वि
पुंगवमणिः सनूकरः॥ लोहितस्रादितिचित्रतनुरुचा रमणएषएवविभ्रसर्जप्रियतमां॥३७॥ अथवंशस्थबिलंछंदः॥
वदंति वंशस्थबिलं जतौजरौ॥ तरौतरोपंचवटीतटीनामवेक्ष्यमाणो रघुराजपुंगवः॥ प्रियाप्रलंभातिविषल
मानसः क्षिराय बभ्राम निकाममविक्लवः॥३८॥ अथेंद्रवंशाछंदः॥ स्यातेंद्रवंशाततजैरसंयुतैः॥ यथा॥ शोकाकु
लः शोकसुतांनितांचरं संवीक्ष्यमाणोरतिसुन्मुमोहसः॥ प्राणप्रियायाः कुचयोः स्मरन्भन्तोन्नतां सकंदर्पव
शोरघूत्तमः॥३९॥ अथवैश्वदेवीछंदः॥ बाणैश्छिन्ना वैश्वदेवी ममौयौ॥ यथा॥ कान्तामेकांतेवन्यभूमीषुहि
त्वासौवर्णरम्यं चित्रमेणंप्रपन्नः॥ तुभ्यन्वीरैं द्रोधामोयेनास्यपश्ले विश्लेषांभोविंदुस्तरं स्वेनचक्रे॥४०॥ अथ
मंदाकिनीछंदः॥ ननरघटितानुमंदाकिनी॥ यथा॥ नवजलधरहृद्यदेहद्युतो परिकलितधनुःशरो घत्वरोर
घुकुलनयनो परेसंततं ममभवतुहृदो रतिर्भूयसी॥४१॥ अथकुसुमविचित्राछंदः॥ नयसहिताम्यौ कुसुमविचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्र।यथा।प्रकलितबाणं धनुरितपाणिकृतसमीरणयानं रिपुकुहानं।रघुपतिमुदारं हृदयमुदारं भजजनपरीतिस्यजम
वभीतिं।४२।अथ तामरसं छंदः॥ इह वदतामरसं नजजाय्यः।यथा।विगलितगापभयान्मुनिदारान्निजतनुमाप्य विकासि
तकायान्यापदवेरजसाविलयस्य विलोक्यप्रमदभरं जननताहृदि मेने॥४३॥ अथ मालती छंदः॥ भवति नजावथ माल
तीजरौ।यथा।मनसि निजे भवराम भक्तितस्य जभवभीति मनुष्यरक्षितः।पदकमले स्य विभाविते मनाक्कुरुहतीर्णअ
वोधसागरं॥४४॥ अथ मणिमाला छंदः॥ त्यौ त्यौ मणिमाला छिन्ना गुहवक्रैः॥ यथा॥ अक्ष्णो मे मम साक्षाद्यो दोक्षि
तलक्षारागो हृदियत्नवन्ये पथि गच्छन्॥ आस्तां भक्तकामः सीतापतिरामः श्यामो जलदाभः प्रत्ताधिकलाभः॥४५॥
अथ जलधरमाला छंदः॥ भ्मौ स्मौ वेदैर्जलधरमालाख्याता।यथा।मेघश्यामो धृतशरचापः खड्गी रक्षा
कारी जगतामाहितपक्षः।रक्षोहंता यत्नात्सा पांडु विद्विड्भिः श्रीमान्नामः सुखमेदयालुस्तात्॥४६॥ इति द्वा
दशाक्षरप्रस्तारस्य षण्णवत्यधिकसहस्रचतुष्टयभेदेषु ४०९६ कियंतो भेदाः॥ ॥ अथ त्रयोदशाक्ष
रप्रस्तारे माया नामके छंदः॥ कृत्वा कर्णौ कुंडलयुक्तौ कुरु रत्नं धृत्वा पादं नूपुरयुक्तं कुरु हारी।मायावच्चे
पिंगलनागो दितमेतन्ज्ञानी नादः पंडितवक्रांबुजमोरं॥४७॥ पदमत्तमयूरे रेतिनामांतरं।यथा।ज्ञान
स्यात्रापात्रा निबद्धो रघुराजः श्रीमान्विश्वामित्रमखं न्दृष्टदूरः।पश्चे सुभ्रात्रा सहितः स्नेहवतायेहाल्लाम
ध्ये राजति वेंदुर्भ निकाये॥४८॥ अथ तारकं छंदः॥ यदि तोटकवृत्तपदे गुरुरेको भवतीह तदोकिल तारकवृत्तं॥
यथा।करुणाकरधामकदंबमरस्साभेनयनेन यनेतरमुख्यमहत्त्यै।तवपादसरोजनतस्य मुदे द्राकूमदु

९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामुपधाव्ये रे दासजनोयं।४९। अथ [illegible] छंदः॥ एकौ रेफश्चतुर्भिल कंदं समाख्याहि। यथा। समस्तैर्मुनींद्रैः समं
